विषय : संस्कृतं

अवधिः - होरात्रयम् पूर्णाङ्काः - 80

*निर्देशाः -*
*(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
*(2) प्रतिखण्ड-उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
*(3) प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*(4) प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
*(5) प्रश्नसंख्या प्रश्नपत्रानुसारं अवश्यमेव लेखनीया।*
*(6) सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।*

खण्डः - 'क' (अपठित-अवबोधनम्) अङ्काः 10

प्र1. अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -

अयम् अस्माकं भारतदेशः। अयं विशालः देशः अस्ति। अस्मिन् देशे विशालाः पर्वताः, दीर्घाः नद्यः मनोहराणि वनानि च सन्ति। हिमालयः अस्य मस्तकम्। असमप्रदेशः अस्य वामः भुजः। काश्मीरप्रदेशः अस्य देशस्य मुकुटम्। समुद्रः अस्य चरणौ क्षालयति। सर्वेऽपि ऋतवः पर्यायेण अत्रैव विराजन्ते। यमुनायाः एकतः राजस्थानं अपरतः च उत्तरप्रदेशः। उत्तरप्रदेशे गङ्गायाः कूले हरिद्वार-प्रयाग-वाराणसी प्रभृतीनि पावनानि तीर्थानि वर्तन्ते। भारतस्य प्रथमः प्रधानमन्त्री श्रीजवाहरलालनेहरूः अस्मिन् प्रदेशे एव जन्म अलभत। उत्तरप्रदेशस्य पूर्वतः बिहारप्रदेशः। कवीन्द्रः रवीन्द्रः बंगदेशस्य गौरवम्। तिलकमहोदयः महाराष्ट्रप्रदेशे अजायत। दक्षिणभारतस्य चत्वारः प्रदेशाः सन्ति। अस्मिन् देशे विविधाः भाषाः विविधाः च सम्प्रदायाः सन्ति। यदि वयं सहयोगेन कार्यं करिष्यामः परस्परं च स्नेहेन मिलित्वा स्थास्यामः तदा अस्माकं सर्वेषां कल्याणं भविष्यति।

*प्रश्नाः*

I. एकपदेन उत्तरत - (½x4=2)
- (i) दक्षिणभारतस्य कति प्रदेशाः सन्ति?
- (ii) कः अस्माकं देशस्य मस्तकम् अस्ति?
- (iii) तिलकमहोदयः कुत्र अजायत?
- (iv) कः अस्य चरणौ क्षालयति?

II. पूर्णवाक्येन उत्तरत - (2x2=4)
- (i) कदा अस्माकं सर्वेषां कल्याणं भविष्यति?
- (ii) गङ्गायाः कूले कानि कानि तीर्थानि वर्तन्ते?

III. यथानिर्देशं उत्तरत - (½x4=2)
- (i) 'विशालः देशः' अनयोः पदयोः विशेषणपदम् किम्?
- (ii) 'पादौ' अस्य पदस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?
- (iii) 'अकार्यम्' अस्य पदस्य किम् विलोमपदम् अत्र प्रयुक्तम्?
- (iv) 'करिष्यामः' अस्य क्रियापदस्य कर्तृपदम् किम्?

IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। (2)

### खण्डः - 'ख' (रचनात्मकं कार्यम्) अङ्काः 15

प्र2. स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति पत्रं मञ्जूषायां दत्तैः उचितपदैः पूरयित्वा पुनः लिखत - (½x10=5)

| मञ्जूषा |
| --- |
| कुशलः,परीक्षाभवनात्, इच्छामि, रमेशः, नमस्कारः, लेखिष्यामि, मित्राणि, पादकन्दुकस्य, सुन्दरः, अध्यापकाः |

(1)________

तिथिः________

प्रिय मित्र प्रवीण!

(2)________।


अहम् अत्र (3)________ अस्मि। छात्रावासे अधुना मम अनेकानि (4)________ सन्ति। अहम् स्वविद्यालयस्य वर्णनं कर्तुम् (5)________। मम विद्यालयः अतीव विशालः (6)________ वातानुकूलितः च अस्ति। सर्वे छात्राः परिश्रमिणः सन्ति। अस्माकं सर्वे (7)________ मनोयोगेन पाठयन्ति। तेषां योग्यता तु वस्तुतः प्रशंसनीया। वयं विद्यालये अश्वारोहणस्य (8)________ क्रिकेटस्य च प्रशिक्षणमपि प्राप्नुमः। विस्तरेण पुनः (9)________।

तव प्रियं मित्र

(10)________

प्र3. अधः प्रदत्तं चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत। (2x5=10)

| मञ्जूषा |
| --- |
| उद्यानस्य, आकाशे, विशालः, पत्रयुक्तः, वृक्षः, खगौ, बालकः, व्यायामम्, सूर्योदयः, शशकः, खादति, भ्रमतः, उत्पतन्ति |



## खण्डः – 'ग' (अनुप्रयुक्त-व्याकरणम्) अङ्काः 25

प्र4. कोष्ठगतशब्देषु उचितविभक्तिं प्रयुज्य वाक्यानि उत्तरपुस्तिकायाम् लिखत : (1x4=4)

(i) ________ उभयतः वृक्षाः सन्ति। (नदी)

(ii) ________ बहिः क्रीडाक्षेत्रम् अस्ति। (विद्यालय)

(iii) सः ________ विना सुखी न अस्ति। (मित्र)

(iv) ________ उपरि काकः अस्ति। (वृक्ष)

प्र5. (क) अधोलिखितवाक्येषु अंकानां स्थाने संख्यावाचकविशेषणैः रिक्तस्थानानि पूरयित्वा पुनः लिखत - (1x4=4)

(i) पात्रे (4) ________ फलानि सन्ति।

(ii) उद्याने (17)________ बालकाः क्रीडन्ति।

(iii) अस्माकं कक्षायाम् (50)________ छात्राः पठन्ति।

(iv) तस्मिन् परिवारे (2)________ बालकौ स्तः।

(ख) कोष्ठकप्रदत्तक्रमवाचकसंख्याशब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत - (1x3=3)

(i) त्वम् ________ आवासे तिष्ठसि। (तृतीय)

(ii) ________ पुष्पस्य नाम किम् अस्ति? (अष्टम)

(iii) ________ बालिका मम भगिनी अस्ति। (प्रथमा)

प्र6. अधोलिखितवाक्येषु रेखांकितपदस्य प्रकृति-प्रत्ययौ पृथक्-पृथक् कृत्वा अथवा संयोज्य पुनः वाक्यानि लिखत- (1x4=4)

(i) वयं भोजनं कृ+क्त्वा विद्यालयं गच्छामः।

(ii) अनिलः कथां श्रुत्वा प्रसन्नः भवति।

(iii) शिष्यः गुरुम् नम्+क्त्वा पाठं पठति।

(iv) माता हसित्वा पुत्रं पश्यति।

प्र7. उचितशब्दरूपैः वाक्यानि पूरयित्वा पुनः लिखत - (1x5=5)

(i) ________ शक्तिः निवसति। (मति शब्द - सप्तमी विभक्तिः एकवचनम्)

(ii) इदं शुद्धं ________ अस्ति। (वारि)

(iii) मम ________ अध्यापकः अस्ति। (पितृ)

(iv) पुत्रः ________ जलं आनयति। (पितृ - चतुर्थी विभक्तिः एकवचनम्)

(v) सः ________ बालकस्य भ्राता अस्ति। (एतद् - षष्ठी विभक्तिः एकवचन)

प्र8. उचितधातुरूपैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत - (1x5=5)

(i) श्वः वयं अवश्यम् एव कार्यम् ________ । (कृ)

(ii) अस्मिन् गृहे अनेके जनाः ________ । (वस्)

(iii) क्षेत्रे पुरुषाः परिश्रमेण कार्यम् ________ । (कृ)

(iv) ह्यः त्वम् औषधिं न ________ । (पा)

(v) चौरः धनम् ________ । (चुर्)

## खण्डः - 'घ' (पठित-अवबोधनम्) अङ्काः 30

प्र9. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

मनोविनोदाय अनारिका भ्रमितुं गृहात् बहिः अगच्छत्। भ्रमणकाले सा अपश्यत् यत् मार्गाः सुसज्जिताः सन्ति। सा चिन्तयति - किमर्थम् इयं सज्जा? सा अस्मरत् यत् अद्य तु मन्त्री आगमिष्यति। सः अत्र किमर्थम् आगमिष्यति इति विषये तस्यां जिज्ञासाः प्रारब्धाः। गृहम् आगत्य सा पितरम् अपृच्छत् - "पितः! मन्त्री किमर्थम् आगच्छति?" पिता अवदत् - "पुत्रि! नद्याः उपरि नवीनः सेतुः निर्मितः। तस्य उद्‌घाटनार्थं मन्त्री आगच्छति।"

I. एकपदेन उत्तरत - (½x2=1)

(i) अद्य कः आगमिष्यति?

(ii) का भ्रमितुम् अगच्छत्?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) अनारिका पितरम् किम् अपृच्छत्?

(ii) भ्रमणकाले सा किम् अपश्यत्?

III. यथानिर्देशं उत्तरत - (½x4=2)

(i) 'अधः' अस्य पदस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(ii) 'चिन्तयति' क्रियापदस्य कर्तृपदम् किम्?

(iii) 'सुसज्जिताः मार्गाः' अनयोः पदयोः विशेष्यपदम् किम्?

(iv) 'नूतनः' अस्य पदस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

प्र10. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

विद्या नाम नरस्य कीर्तिरतुला भाग्यक्षये चाश्रयः<br>
धेनुः कामदुधा रतिश्च विरहे नेत्रं तृतीयं च सा।<br>
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणम्<br>
तस्मादन्यमुपेक्ष्य सर्वविषयं विद्याधिकारं कुरु ॥

I. एकपदेन उत्तरत - (½x2=1)

(i) तृतीयं नेत्रं का अस्ति?

(ii) विद्या कस्य अतुला कीर्तिः अस्ति?

II. पूर्णवाक्येन उत्तरत -

(1x2=2)

(i) विद्या कैः विना भूषणम्?

(ii) विद्या कस्य महिमा?

III. यथानिर्देशं उत्तरत -

(1x2=2)

(i) 'यशः' अस्य पदस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

(ii) 'तृतीयं नेत्रम्' अनयोः पदयोः विशेषणपदम् किम्?

प्र11. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

तेजिन्दरः - शुचे! ध्वजस्य मध्ये एकं नीलवर्णं चक्रं वर्तते?

शुचिः - आम् आम्। इदम् अशोकचक्रं कथ्यते। एतत् प्रगतेः न्यायस्य च प्रवर्तकम्। सारनाथे अशोकस्तम्भः अस्ति। तस्मात् एव एतत् गृहीतम्।

प्रणवः - अस्मिन् चक्रे चतुर्विंशतिः अराः सन्ति।

मेरी - भारतस्य संविधानसभायां 22 जुलाई 1947 तमे वर्षे समग्रतया अस्य ध्वजस्य स्वीकरणं जातम्?

तेजिन्दरः - अस्माकं त्रिवर्णः ध्वजः स्वाधीनतायाः राष्ट्रगौरवस्य च प्रतीकः। अतएव स्वतन्त्रतादिवसे गणतन्त्रदिवसे च अस्य ध्वजस्य उत्तोलनं समारोहपूर्वकं भवति।

I. एकपदेन उत्तरत -

(½x2=1)

(i) अशोकचक्रे कति अराः सन्ति?

(ii) अशोकस्तम्भः कुत्र अस्ति?

II. पूर्णवाक्येन उत्तरत -

(1x2=2)

(i) त्रिवर्णध्वजस्य उत्तोलनं कदा भवति?

(ii) त्रिवर्णः ध्वजः कस्य प्रतीकः?

III. यथानिर्देशं उत्तरत -

(½x4=2)

(i) 'नीलवर्णं चक्रम्' अनयोः पदयोः विशेषणपदम् किम् अस्ति?

(ii) 'युष्माकम्' अस्य पदस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iii) 'सूचकः' अस्य पदस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

(iv) अस्मिन् संवादे 'एतत्' कस्मै प्रयुक्तम्?

प्र12. अधोलिखित-अंशस्य अन्वयं उचितपदक्रमेण पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (1x4=4)

वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते।
क्षीयन्तेऽखिलभूषणानि सततं वाग्भूषणं भूषणम्॥

अन्वयः एका वाणी (1)________ समलङ्करोति या (2)________ धार्यते, अखिलभूषणानि सततं (3)________ (केवल) वाग्भूषणं (4)________ (अस्ति)।

प्र13. अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (1x4=4)

(i) समारोहस्य अन्ते मोदकानि मिलिष्यन्ति।

(ii) देशयोः मध्ये स्वस्था स्पर्धा भविष्यति।

(iii) प्रथमं गजस्य कर्णे शब्दं कुरु।

(iv) सा बहून् प्रश्नान् पृच्छति।

प्र14. अधोलिखितवाक्यानि घटनाक्रमानुसारेण पुनः लिखत - (½x8=4)

(i) मण्डूकः तान् सर्वान् एकम् उपायम् अवदत्।

(ii) काष्ठकूटः चटकां मक्षिकायाः समीपम् अनयत्।

(iii) एकस्मिन् वृक्षे एका चटका वसति स्म।

(iv) ते सर्वे मिलित्वा मण्डूकस्य समीपम् अगच्छत्।

(v) गर्तं जलाशयं मत्वा गजः गर्तस्य अन्तः पतितः मृतः च।

(vi) चटकायाः नीडं भूमौ अपतत्।

(vii) गजः वृक्षस्य शाखां शुण्डेन अत्रोटयत्।

(viii) चटकायाः विलापं काष्ठकूटः नाम खगः अशृणोत्।

प्र15. अर्थैः सह शब्दानां मेलनम् कृत्वा उत्तरपुस्तिकायां पुनः लिखत - (½x6=3)

| शब्दाः | अर्थाः |
|---|---|
| ध्वजः | सम्पूर्णे |
| समवायः | त्यक्त्वा |
| निखिले | पताका |
| अपहाय | परस्य |
| कुसुम् | समूहः |
| अन्यस्य | पुष्पम् |